**Annexure - ' H '**

## पाठ्यक्रम
## संस्कृतम् (सम्प्रेषणात्मकम्) 122
## दशमी कक्षा (2012-2013)
## सततं व्यापकम् मूल्यांकनम् (द्वितीयं सत्रम्)

| | | | | | | | |
|---|---|---|---|---|---|---|---|
| 1 | (i) | रचनात्मक-मूल्यांकन (Formative Assessment-3) | - | 3 | - | 10% | 20% |
| | (ii) | रचनात्मक-मूल्यांकनम् (Summative Assessment-2) | - | 1 | - | 10% | |

2. संकलनात्मक-मूल्यांकन - 2

1. रचनात्मक-मूल्यांकन संस्कतं रचनात्मकानि कार्याणि, व्यवहारे संस्कृत-प्रयोगः, संस्कृत गतिविध यः, प्रायोजनात्मकं कार्य, कक्षाकार्याणि, गृहकार्य च।
2. संकलनात्मकमूल्यांकनाय परीक्षणपत्रम् (मार्चमासे) परीक्षणपत्रे चत्वारः खण्डाः भविष्यन्ति -

| | | |
|---|---|---|
| 'क' खण्डः | अपठित-अवबोधनम् | (10) |
| 'ख' खण्डः | रचनात्मक-कार्यम् | (15) |
| 'ग' खण्डः | अनुप्रयुक्त-व्याकरणम् | (30) |
| 'घ' खण्डः | पठित-अवबोधनम् | (35) |

**खण्डानुसारं विषयाः मूल्यभारः च**

| खण्डः | विषयाः | प्रश्नप्रकाराः | प्रश्नसंङ्ख्याः | मूल्यभारः |
|---|---|---|---|---|
| | **अपठित-अवबोधनम्** | | | |
| 'क' (i) | अपठित-अवबोधनम् एकः अनुच्छेदः | बहुविकल्पात्मकाः (MCQ) लघूत्तरात्मकाः (SA) | | 10 |
| | **पूर्णभारः** | | | **10** |
| ख | **रचनात्मक-कार्यम्** | | | |
| (i) | अनौपचारिकपत्रम् | निबन्धात्मकाः | 1 | 5 |
| (ii) | चित्रवर्णनम्/अनुच्छेदलेखनम् | निबन्धात्मकाः | 1 | 10 |
| | **पूर्णभारः** | | | **15** |
| 'ग' | **अनुप्रयुक्तव्याकरणम्** | | | |
| (i) | सन्धि | लघूत्तरात्मकाः | 1 | 5 |
| (ii) | समासः | बहुविकल्पात्मकाः | 1 | 6 |
| (iii) | प्रत्ययाः | लघूत्तरात्मकाः | 1 | 5 |
| (iv) | अव्ययपदानि | बहुविकल्पात्मकाः | 1 | 5 |
| (v) | सङ्ख्या | बहुविकल्पात्मकाः | 1 | 4 |

| | | | | |
|---|---|---|---|---|
| (vi) | संशोधनकार्यम् | बहुविकल्पात्मकाः | 1 | 5 |
| | **कुलभारः** | | | **30** |
| **'घ'** | **पठित-अवबोधनम्** | | | |
| (i) | गद्यांश-पद्यांश-नाट्यांशाः | ब.वि./लघूत्तरात्मकाः | 1 | 15 |
| (ii) | भावावबोधनम् | बहुविकल्पात्मकाः | 1 | 4 |
| (iii) | श्लोकान्वयः | लघूत्तरात्मकाः | 1 | 4 |
| (iv) | प्रश्न-निर्माणम् | लघूत्तरात्मकाः | 1 | 4 |
| (v) | कथाक्रमः | निबंधात्मकाः | 1 | 4 |
| (vi) | शब्दार्थमेलनम् | बहुविकल्पात्मकाः | 1 | 4 |
| | **पूर्णभारः** | | | **35** |

**टिप्पणी – प्रश्नपत्रम् नवति-अंकानाम् भविष्यति**

***पठित-अवबोधन (खण्ड घ) 3-5 अंकानाम् मूल्यसंबन्धिताः लघूत्तरात्मकाः प्रश्नाः भविष्यन्ति।**

**पाठ्यक्रम**
**संस्कृतम् (सम्प्रेषणात्मकम्) 122**
**दशमी कक्षा (2012–2013)**
**सततं व्यापकम् मूल्यांकनम् (द्वितीयं सत्रम्)**

(i) **रचनात्मक–मूल्यांकनम्** **20%**

(Formative Assessment)

(ii) **रचनात्मक–मूल्यांकन 3 – 10%**

(iii) **रचनात्मक–मूल्यांकन 4 – 10%**

(Formative 3 10%)

(Formative 4 10%)

**आधारभूत–अधिगम–गतिविधयः**

- ❖ कक्षासु संस्कृतेन वार्तालापः
- ❖ परियोजनाकार्यम्
- ❖ कक्षाकार्यम्
- ❖ गृहकार्यम्
- ❖ पाठ्यसहगामिक्रियाः

**(आधारभूतकौशलानि अधिकृत्य)**

- ❖ श्लोकोच्चारणम्, कवितापाठः, गीतगायनम्, काव्यापाठः
- ❖ गद्यवाचनम्, कथाकथनम्, स्वपरिचयः, परिवेशपरिचयः (संक्षेपेण)
- ❖ लेखनकार्यम् – संकेताधारितकथालेखनम्, वर्णनम्, चित्रकथा, अनुच्छेदलेखनम्, संवादलेखनम्, निबंधलेखनम्, कवीनां जीवनपरिचयः, प्राचीनकवीनां वैशिष्ट्यम्
- ❖ भाषणप्रतियोगिता
- ❖ अन्त्याक्षरी
- ❖ शब्दसंग्रह
- ❖ शब्दकोशनिर्माणम् – (फल–पुष्प–पशु–पक्षी–शाक–गृह–वस्तूनां नानानि)
- ❖ अभिनयः / भूमिकानिर्वाहः
- ❖ समाचार–श्रवणम्–वाचनम् (दूरदर्शनेन आकाशवाण्या च)
- ❖ भाषाक्रीड़ाः
- ❖ सान्द्रमुद्रिका–श्रवणम् / निर्माणम् (C.D.)
- ❖ सूक्तिसंग्रहः, कथासंग्रहः, प्राचीनविज्ञान–सम्बद्ध–लेखसंग्रहः
- ❖ पत्रलेखनम्, पत्रिकासम्पादनम्, भित्तिपत्रिका।
- ❖ वाक्यपूर्तिः
- ❖ दैनिक–व्यवहार–वाक्य– संग्रह
- ❖ प्रातः कालीनसभा

**अवलोकनीयानि तत्त्वानि**

- ✱ उच्चारणम्
- ✱ गति-यति-लय-भावभंगिमा
- ✱ आरोह-अवरोहौ (सम्भाषणे)
- ✱ अवबोधनम्
- ✱ समुचितशब्दप्रयोगः
- ✱ विरामचिह्नप्रयोगः
- ✱ वर्तनीविन्यासः
- ✱ आत्मविश्वासः
- ✱ संस्कृत-प्रयोगः (दैनिक-व्यवहारे)

| | | |
|---|---|---|
| **(2) संकलनात्मकं मूल्यांकनम्** | **30%** | **90 अङ्का** |
| (Summative Assessment) | | 30% |

**'क' खण्डः (अपठित-अवबोधनम्)** **(10)**

**(एकः गद्यात्मकः खण्डः)**

80-100 शब्दपरिमितः गद्यांशः (सरलकथा, वर्णनम् वा)

- ✱ एकपदेन पूर्णवाक्येन च अवबोधनात्मकं कार्यम् (4)
- ✱ अनुच्छेद-आधारितम् भाषिकं कार्यम् (MCQ) (4)
- ✱ समुचितं शीर्षकप्रदानम् (2)

**नोट - भाषिककार्याय तत्त्वानि** **4 अंङका**

- ✱ वाक्ये कर्तृ-क्रिया पदचयनम्
- ✱ कर्तृ-क्रिया-अन्वितिः
- ✱ विशेषण-विशेष्य-चयनम्
- ✱ सर्वनामप्रयागः
- ✱ पर्याय-विलोमपद-चयनम्

**'ख' खण्डः रचनात्मक कार्यम्** **15 अंङ्का**

**(मणिका-अभ्यासपुस्तक-आधारितम्)**

(i) सङ्केताधारितम् अनापचारिकं पत्रम् (5)

(ii) चित्राधारितम् वर्णनम् अथवा अनुच्छेदलेखनम् वा (10)

**'ग' खण्डः अनुप्रयुक्तव्याकरणम्** **30 अंङ्का**

**(मणिका-अभ्यासपुस्तक-आधारितम्)**

1. **सन्धिकार्यम्** **(5)**

(i) **स्वरसन्धिः** - यण्, अयादिः, पूर्वरूपम् **(2)**

(ii) **व्यञ्जनसन्धिः** - मोऽनुस्वारः, वर्गीयप्रथमाक्षराणां तृतीयवर्णेपरिवर्तनम्, प्रथमवर्णस्य पञ्चमवर्णे परिवर्तनम्

**(2)**

(iii)**विसर्गसन्धिः** - विसर्गस्य लोपः विसर्गस्थाने स् श् ष् (1)

2. **समासः (वाक्येषु समस्तपदानां विग्रहः विग्रहपदानां च समासः)** **(6)**

(i) **द्वन्द्वः** **(2)**

(ii) **बहुव्रीहिः समानाधिकरणम्** **(2)**

(iii)**अव्ययीभावः (अन्, उप्, सह्, निर्, प्रति, यथा)** **(2)**

3. **प्रत्ययाः** **(5)**

- **कृदन्ताः** - शतृ, शानच् (2)
- **तद्धिताः** - त्व, तल् (2)
- **स्त्रीप्रत्ययौ** - टाप्, ङोप् (1)

4. **अव्ययपदानि** **(5)**

इति, कदा, कुतः, मा, यत्, यत्र-कुत्र, सम्प्रति, यदा-कदा, यावत्, श्वः, ह्यः, बहिः, कदापि, किमर्थम् ।

5. **सङ्ख्या** एकतः पञ्चपर्यन्तं वाक्यप्रयोगः। एकतः शतपर्यन्तं संख्याज्ञानम् (4)

6. **वचन** - लिङ्ग - पुरुष - लकार - दृष्ट्या संशोधनम् (5)

**'घ' खण्डः (पठित-अवबोधनम्)** **35 अंङका**

(मणिका (द्वितीय भागः) पाठ्यपुस्तकम् अधिकृत्य)

1. पाठ्यपुस्तकस्य सामग्रीम् अधिकृत्य अवबोधनात्मकं कार्यम् (15)

(i) गद्यांशः 5

(ii) पद्यांशः 5

(iii)नाट्यांशः 5

**प्रश्न प्रकारा:** – एकपदेन पूर्णवाक्येन च प्रश्नोत्तराणि ।
भाषिककार्यम्। (बहुविकल्पात्मका: प्रश्ना:)

2. भावबोधनम् (4)
3. श्लोकान्वय: (4)
(रिक्तस्थानपूर्तिद्वारा)
4. वाक्येषु रेखांकितपदानि अधिकृत्य चतुर्णा प्रश्नानां निर्माणम् । (4)
5. कथाक्रमसंयोजनम्
(क्रमरहित-अष्टवाक्यानां क्रमपूर्वकं संयोजनम्) (4)
5. शब्दार्था: (चतुर्णाम्)
(सन्दर्भे शब्दप्रयोगद्वारा शब्दार्थमेलनद्वारा वा) (4)
(बहुविकल्पात्मका: प्रश्ना:)

**पाठानां नामानि** (पुस्तक-मणिका (संस्कृत-पाठ्यपुस्तकम्) (दशमश्रेण्यै)

| **पाठसङ्ख्या** | **पाठनाम्** |
|---|---|
| षष्ठ: पाठ: | साधुवृत्तिं समाचरेत् |
| सप्तम् पाठ: | रमणीया हि सृष्टिरेषा |
| अष्टम् पाठ: | तिरुक्कुरल् - सूक्ति - सौरभम् |
| नवम: पाठ: | राष्ट्रं संरक्ष्यमेव हि |
| दशम: पाठ: | सुस्वागतं भो ! अरुणाचलेऽस्मिन् |
| एकादश: पाठ: | कालोऽहम् |

टिप्पणी - उत्तराणि केवलं संस्कृतेन लेखितव्यानि

**पाठ्यपुस्तकें**

(i) **मणिका** (पाठ्यपुस्तकम्) भाग-2 संसोधितसंस्करणम्
(प्रकाशनम् : के. मा. शि. बो. द्वारा)

(ii) **मणिका** (अभ्यासपुस्तकम्) भाग-2 संसोधितसंस्करणम्
(प्रकाशनम् : के. मा. शि. बो. द्वारा)

# संस्कृतम् (सम्प्रेषणात्मकम्) 122
## दशमी कक्षा (द्वितीयं सत्रम्)
## (2012-13)

| खण्डः | विषयाः | प्रश्नप्रकाराः | प्रश्नसंङ्ख्या | मूल्यभारः | अङ्काः |
|---|---|---|---|---|---|
| 'क' | अपठित-अवबोधनम् एकः अनुच्छेदः (80-100 शब्दाः) | | | | |
| (*i*) | एक पदेन, पूर्णवाक्येन च अवबोधनात्मक कार्यम् | लघूत्तरात्मकाः | 4 | 1×4=4 | 4 |
| (*ii*) | अनुच्छेद-आधारितम् भाषिकं कार्यम् | बहुविकल्पात्मकाः | 4 | 1×4=4 | 4 |
| (*iii*) | समुचितं शीर्षकप्रदानम् | लघूत्तरात्मकः | 1 | 2×1=2 | 2 |
| **भारः** | | | | | **10** |
| 'ख' | **रचनात्मक–कार्यम्** | | | | |
| (*i*) | अनौपचारिकं पत्रम् (रिक्तस्थानपूर्ति द्वारा) | निबन्धात्मकः | 1 | 5×1=5 | 5 |
| (*ii*) | चित्रवर्णनम् अनुच्छेदलेखनम् वा (पञ्च वाक्यानि) | निबन्धात्मकः | 1 | 10×1=10 | 10 |
| **भारः** | | | | | **15** |
| 'ग' | **अनुप्रयुक्त-व्याकरणम्** | | | | |
| (*i*) | सन्धिः -<br>स्वर (2)<br>व्यंजन (2)<br>विसर्ग (2) | लघूत्तरात्मकाः | 5 | 1×5=5 | 5 |
| (*ii*) | समासः -<br>द्वन्द्वः (2)<br>बहुव्रीहिः (2)<br>अव्ययीभावः (2) | बहुविकल्पात्मकाः | 6 | 1×6=6 | 6 |
| (*ii*) | प्रत्ययाः-<br>कृदन्ताः (2)<br>तद्धिताः (2)<br>स्त्रीप्रत्ययाः (1) | लघूत्तरात्मकाः | 5 | 1×5=5 | 5 |
| (*iv*) | अव्ययपदानि | लघूत्तरात्मकाः | 5 | 1×5=5 | 5 |
| (*v*) | सङ्ख्या | बहुविकल्पात्मकाः | 4 | 1×4=4 | 4 |
| (*vi*) | संशोधनकार्यम् | बहुविकल्पात्मकाः | 5 | 1×5=5 | 5 |

| भारः | | | | | 30 |
|---|---|---|---|---|---|
| 'घ' | पठित–अवबोधनम् | | | | |
| (*i*) | गद्यांशः | बहुविकल्पात्मकाः | 2 | 1×2=2 | 5 |
| | | लघूत्तरात्मकाः* | 3 | 1×3=3 | |
| (*ii*) | पद्यांशः | बहुविकल्पात्मकाः | 2 | 1×2=2 | 5 |
| | | लघूत्तरात्मकाः* | 3 | 1×3=3 | |
| (*iii*) | नाट्यांशः | बहुविकल्पात्मकाः | 2 | 1×2=2 | 5 |
| | | लघूत्तरात्मकाः* | 3 | 1×3=3 | |
| (*iv*) | भावावबोधनम् | बहुविकल्पात्मकाः | 4 | 1×4=4 | 4 |
| (*v*) | श्लोकान्वयः | लघूत्तरात्मकाः | 4 | 1×4=4 | 4 |
| (*vi*) | प्रश्न–निर्माणम् | लघूत्तरात्मकाः | 4 | 1×4=4 | 4 |
| (*vii*) | कथाक्रमः | निबंधात्मकाः | 1 | 4×1=4 | 4 |
| (*viii*) | शब्दार्थमेलनम् | बहुविकल्पात्मकाः | 4 | 1×4=4 | 4 |
| भारः | | | | | 35 |
| | | | | | 90 |

***पठित–अवबोधन (खण्ड घ) 3–5 अंकानाम् मूल्यसंबन्धिताः लघूत्तरात्मकाः प्रश्नाः भविष्यन्ति।**

| क्र. सं. | प्रश्न–प्रकाराः | प्रश्न संख्या | कुल अंक |
|---|---|---|---|
| 1. | बहुविकल्पात्मकाः | 33 | 33 |
| 2. | लघूत्तरात्मकाः | 37 | 38 |
| 3. | निबन्धात्मकाः | 3 | 19 |
| यागः | | 73 | 90 |

**संस्कृत**

**कक्षा - दशमीं**

**नमूना प्रश्न**

**खण्ड - क**

**(अपठित अवबोधनम्)**

**पूर्णांका: -100**

**प्रश्न 1. अधोलिखितम् अनुच्छेदं पठित्वा प्रश्नान् उत्तरत** **10**

धन्यं तत् राष्ट्रं यस्य शिक्षका: सततं चिन्तने लेखने पाठने विद्यार्थिनां दिग्दर्शन च निरता: सन्ति। राष्ट्रनिर्माणस्य कार्ये अहर्निशम् संलग्नेभ्य: एतेभ्य: शिक्षकेभ्य: नम:।

(क) एकपदेन उत्तरत् (1×2=2)

(अ) क: राष्ट्रस्य निर्माता भवति?
(ब) केभ्य: प्रेरणां गृहीत्वा विद्यार्थिन: उच्चादर्शान् पलयन्ति?

(ख) पूर्णवाक्येन उत्तरत (1×2=2)

(अ) सद्गुरु: किं करोति?
(ब) कीदृशं राष्ट्र धन्यम्?

(ग) प्रदत्तविकल्पेभ्य: उचितम् उत्तरं चित्वा लिखत - (1×4=4)

(अ) 'भूमिका' इति पदस्य किं विशेषणपदम् अस्ति?

(i) अध्यापकस्य (ii) महत्त्वपूर्णा (iii) जीवननिर्माणं (iv) शिक्षितजनस्य

(ब) 'ये' इति पदम् केभ्य: प्रयुक्तम्?

(i) विद्यार्थिभ्यः (ii) राष्ट्रवासिभ्यः (iii) आदर्शेभ्यः (iv) शिक्षकेभ्यः

(स) 'कुर्वन्ति' इति पदस्य कर्तृपदम् किम्?

(i) एते (ii) शिक्षकाः (iii) ये (iv) आधारशिलायाः

(द) 'निरन्तरम्' इति पदस्य किं पर्यायपदम् गद्यांशे प्रयुक्तम्?

(i) सततम् (ii) चिन्तनम् (iii) लेखनम् (iv) दिग्दर्शनम्

(घ) अस्य अनुच्छेदस्य कृते समुचितंशीर्षकं लिखत। 2

## खण्ड – ख

**प्रश्न 1.** भवती श्रेया। भवत्या दिल्ली नगरे सम्पन्ना संस्कृतप्रदर्शिनी दृष्टा। तस्या: वर्णनं कुर्वन्ती भवती पञ्जाबप्रदेशे निवसन्तीं दिव्यां प्रति लिखिते पत्रे मञ्जूषात: पदानि चित्वा रिक्तस्थानानि पूरयत। ½×10=5

सर्वोदय विद्यालय:

(i)...................

तिथि..........................

प्रिय सखि दिव्ये!

सस्नेहं ..........II।

अत्र कुशलं तत्रास्तु। अस्मिन् पत्रे अहं तुभ्यम् एकाम् विशिष्टां वार्ताम् निवेदयामि यत् मयाIII........ .............. एका अपूर्वा प्रदर्शिनी दृष्टा। दिल्लोनगरे विश्वसंस्कृतसम्मेलनम् आयोजितम् अभवत्। तस्मिन् एव संस्कृतविदुषां गोष्ठ्य:............IV। प्रतिसायं नाट्यसमारोह:अपि चलति स्म। सप्तदिवसीये कार्यक्रमे अनेकेषां संस्कृतनाटकानां...........V अभवत्। तदैव 'विश्ववारा' अभिधाना संस्कृतप्रदर्शिनी..........VI आयोजिता। प्रदर्शिन्यां प्राचीनकाले प्रयुक्तानि यज्ञपात्राणि.........VII आसन्। अनेकहस्तलिखिता: पाण्डुलिपय:, शिलालेखानां प्रतिकृतय:........ VIII दुर्लभित्तिचित्राणि प्रदर्शितानि आसन्। तत्र एव संस्कृतपुस्तकमेलकमपि आयोजितम्। तत्र चतुर: वेदान्, अष्टाध्यायीं, चरकसंहितां कौटिल्यस्य अर्थशास्त्रं इति आदीन् ग्रन्थान् दृष्ट्वा अहम्अति–आनन्दम्.........IX। यदा त्वम् दिल्लीनगरम् आगमिष्यसि तर्हि तत: क्रीतानि

पुस्तकानि दर्शयिष्यामि।


मातापितृभ्याम् मे नमो नम:।

भवत्या: सखी

x.............

| |
|---|
| मञ्जूषा – अभवन्, श्रेया, दिल्लीनगरात्, गतमासे, प्रदर्शितानि, नमोनम:, मञ्चनम्, अनेकानि, अन्वभवम्, अपि |

2. अधोदत्तचित्रस्य वर्णनं मञ्जूषायां प्रदत्तपदानां सहायतया पञ्चवाक्येषु कुरुत। 2×5=10



मञ्जूषा

| |
|---|
| विद्यालयः, चत्वारः, कन्दुकेन, बालिकाः, क्रीडन्ति, प्रसन्नाः, तिस्रः, रज्जुक्रीडाम्, सुंदरभवनम् वृक्षः, सन्ति, धावन्ति, कुर्वन्ति, अस्ति, अपि |

अथवा

'मम विद्यालयः' इति विषयम् अधिकृत्य मञ्जूषायाः सहायतया पञ्चक्रचवाक्यानां निर्माणं कुरुत।

मञ्जूषा –

| |
|---|
| अर्द्धावकाशे, क्रीडाक्षेत्रे, द्वे, पादकन्दुकक्रीडाम्, पठन्ति, छात्राः, योग्याः, पुरस्कारान् लभन्ते, अध्यापकाः, पाठयन्ति, यच्छन्ति, अस्ति |

## खण्डः 'ग'

## (अनुप्रयुक्तं व्याकरणम्)

30 अङ्काः

**प्रश्न 1.** अधोलिखितवाक्येषु रेखाङ्कितपदेषु सन्धिं सन्धिच्छेदं वा कृत्वा लिखत। 1×5=5

(i) एतत् कार्यं तु कुक्कुटोऽपि करोति।

(ii) उभौ + एव मित्रे आस्ताम्।

(iii) जगत्+नाथः सर्वान् रक्षति।

(iv) अयं शोकः

(v) आसीत् प्रच्छन्न भाग्यनामधेयः कः+चित् कुमारः।

**प्रश्न 2.** अधोलिखितवाक्येषु रेखाङ्कितपदानां समासं विग्रहं वा प्रदत्तविकल्पेभ्यः चित्वा लिखत।

1×6=6

I प्रकृतिः सस्नेहं सर्वान पलयति।

(1) सखिभिः सह (2) स्नेहेन सहितम्

(3) तैलेन सह (4) घृतेन सह

II अये! कथं कथं श्रीकृष्णार्जुनौ युधिष्ठिरः च।

(1) श्रीकृष्णः च अर्जुनः च (2) श्रीकृष्णौ अर्जुनौ च

(3) श्रीकृष्णः अर्जुनौ च (4) श्रीकृष्णम् अर्जुनं च

III प्रचण्डज्वालः अग्निः सर्वत्र प्रसरति।

(1) प्रचण्डः ज्वालः च (2) प्रचण्डाः ज्वालाः यस्य सः

(3) प्रचण्डं ज्वालां (4) प्रचण्डाः ज्वालाः

IV बालः रथस्य पश्चात् धावति।

(1) अनुरथस्य (2) अनुरथम्

(3) अनुरथः (4) रथानु

V इच्छाम् अनतिक्रम्य कार्यं कुरु।

(1) यथा इच्छाम् (2) इच्छानुसारम्

(3) यथेच्छम् (4) यथा इच्छाम्

VI कृतभोजनः बालः विद्यालयं गच्छति।

(1) कृतम् भोजनम् (2) कृतं भोजनम् येन सः

(3) कृतं भोजनं येन सः (4) कृतस्य भोजनस्य

प्रश्न 3. (क) अधोलिखितवाक्येषु रेखाङ्कितपदानां प्रकृतिप्रत्ययौ संयोज्य विभज्य वा समुचितम् उत्तरं विकल्पेभ्यः चित्वा लिखत– 1/2×6=3

(i) निजगृहं भासमानं अवलोक्य तौ दम्पती आश्चर्येण परस्परम् अपश्यताम्।

(1) भास्+शानच् (2) भा+शानच्

(3) भास्+मानम् (4) भास्+मतुप्

(ii) न जाने कथं माम् न परिगणयन्तः जनाः चित्रवर्णम् अहिभुजं 'राष्ट्रपक्षी' इति मन्यन्ते।

(1) परिगणय + शतृ (2) परिगण्+शतृ

(3) परिगणयत्+ क्त (4) परि+गण्+शतृ

(iii) एषा मम पुत्र+ङीप् क्रीडति।

(1) पुत्रा (2) पुत्रीम्

(3) पुत्री (4) पुत्रीः

(iv) प्रकृतेः सुन्दरतायाः वर्णनम् कठिनम्।

(1) सुन्दर+तल् (2) सुन्दर+टाप्

(3) सुन्दरत+तल् (4) सुन्दरी+तल्

(v) स्वच्छ + तल् सर्वेभ्यः स्वास्थ्यदायिनी भवति।

(1) स्वच्छतल् (2) स्वच्छन्दता

(3) स्वच्छन्दताम् (4) स्वच्छता

(vi) छात्रान् <u>अध्यापक+टाप्</u> पाठयति।

(1) अध्यापकः (2) अध्यापिका

(3) अध्यापकाः (4) अध्यापकम्

प्रश्न 3 (ख)अधोलिखितवाक्ययोः प्रकृतिप्रत्ययौ संयोज्य विभज्य वा लिखत। 1×2=2

(1) गुरुं (सेव्+शानच्) ............. शिष्यः मोदते।

(2) गुरोः <u>गुरुत्वम्</u> अभिनन्दनीयम्।

प्रश्न 4. अधोलिखितवाक्येषु मञ्जूषायां प्रदत्तैः उचितैः अव्ययपदैः रिक्तस्थानानि पूरयित्वा लिखत।

1×5=5

(क) अहम् ................. दिल्लीनगरं गमिष्यामि।

(ख) अस्य याच्ञा वृथा ........... अस्तु।

(ग) नगरात् ............. एकः आश्रमः अस्ति।

(घ) बालाः ग्रामं ............... अगच्छन्।

(ङ) सःअत्र ........... आगमिष्यति?

मञ्जूषा-

| |
|---|
| बहिः, ह्यः, मा, किमर्थम्, श्वः |

प्रश्न 5. (क) प्रदत्तविकल्पेभ्यः उचितसंख्यापदैः चित्वा वाक्यानि पूरयत- 1×4=4

I कूपे ............ महिलाः तिष्ठन्ति।

(i) चत्वारि (ii) चत्वारः

(iii) चतस्रः (iv) चतसृः

II क्रीडाक्षेत्रे ............. बालकः क्रीडति।

(i) एकः (ii) एकम्

(iii) एका (iv) एकेन

III लतायाम् ............. पुष्पाणि विकसन्ति।

(i) तिस्त्रः (ii) त्रीणि

(iii) तिसृः (iv) त्रीन्

IV विद्यालये ................. बालौ पुरस्कारम् प्राप्तवन्तौ।

(i) द्वे (ii) द्वयोः

(iii) द्वौ (iv) द्वाभ्याम्

प्रश्न 5. (ख) उचितसंख्यापदेन रिक्तस्थानानि पूरयत। 1×2=2

(i) विद्यालये (51) ............... छात्राः संस्कृतं पठन्ति।

(ii) उद्याने (96) .................. वृक्षाः सन्ति।

प्रश्न 6.अधोलिखितवाक्येषु रेखाङ्कितपदम् अशुद्धम् अस्ति। उचितम् उत्तरं प्रदत्तविकल्पेभ्यः चित्वा अशुद्धपदं संशोध्य लिखत – 1×5=5

I वयम् स्वकार्याणि ध्यानेन कुर्वः।

(1) कुर्वन्ति (2) कुरुत

(3) कुरुत (4) कुर्मः

II ह्यः विद्यालये उत्सवः भविष्यति।

(1) अभवः (2) अभवत्

(3) भवेत् (4) भविष्यतः

III सर्वे बालिकाः क्रीडन्ति।

(1) सर्वाः (2) सर्वाणि

(3) सर्वाम् (4) सर्वा

IV कक्षायाम् सर्वे छात्रः पठन्ति।

(1) छात्रा (2) छात्राः

(3) छात्रे (4) छात्रैः

V अस्मिन् प्रदेशे <u>द्वौ</u> नद्यौ वहतः।

(1) द्वयोः (2) द्वाभ्याम्

(3) द्वे (4) द्वयो

## खण्ड: घ

प्रश्न 1.अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नान् उत्तरत- 4 अंक

अथ पूर्वमित्रं दुष्ट्बुद्धि: प्रच्छन्नभाग्यस्य धनागमवृतान्तं श्रुत्वा कदाचित् मध्यरात्रे तस्य एव गृहे चौर्यार्थं सन्धि-खननसुयोगं विलोकयन् स्थित:। तस्मिन्नेव काले सुप्तोत्थित: प्रच्छन्नभाग्य: सम्भ्रान्तचित्त: स्वपत्नीं सम्बोध्य उवाच-अहो। विचित्र: स्वप्नो मया दृष्ट:। अस्माकं क्षेत्रे अश्वत्थतरुमूले सुवर्णपूरित: कलश: विद्यते इति। तच्छ्रुत्वा परद्रव्ये अनासक्ता सा न्यवेदयत्-नाथ! विरम अस्मात् लोभात्। दुष्टबुद्धि: तु तयो: वार्तां श्रुत्वा झटिति एव क्षेत्रं गत:। तत्र अश्वत्थतरुमूलं खनित्वा तं सुवर्णकलशं प्राप्तवान्।

I एकपदेन उत्तरत ½ × 2 = 1

(क) पूर्वमित्रं दुष्टबुद्धि: कस्य धनागमवृतान्तं श्रुतवान्?

(ख) क: झटिति एव क्षेत्रं गत:?

II पूर्णवाक्येन उत्तरत 2×1=2

(i) परद्रव्ये अनासक्ता प्रच्छन्नभाग्यस्य पत्नी किम् न्यवेदयत् ?

III विकल्पेभ्य: उचितम् उत्तर चित्वा लिखत- ½ × 2 = 1

(क) 'स्वप्न:' इति पदस्य किम् क्रियापदम्?

(1) मया (2) दृष्ट: (3) विचित्र: (4) अहो

(ख) परेषाम् धने इति अर्थे किं पदं गद्यांशे प्रयुक्तम्?

(1) अश्वत्थतरुमूले (2) अस्मात् (3) परद्रव्ये (4) अनासक्ता

प्रश्न 2. अधोलिखितं पद्यांशं पठित्वा प्रदत्तप्रश्नान् उत्तरत 4 अंक

आचार: प्रथमो धर्म: इत्येतद् विदषां वच:।

तस्माद् रक्षेत् सदाचारं प्राणेभ्योऽपि विशेषत:।।

प्रश्ना :-

(I) एकपदेन उत्तरत

(1) क: प्रथम: धर्म:? ½×2=1

(2) सदाचार: केभ्य: अपि विशेषत: रक्षणीय:?

(II) पूर्णवाक्येन उत्तरत 2×1=2

(1) विदुषां वचः किम्?

(III) प्रदत्तविकल्पेभ्यः उचितम् उत्तरं लिखत। ½×2=1

(क) 'आचारः प्रथमो धर्मः इत्येतद्' अत्र किं अव्ययपदम्?

(i) आचारः (ii) प्रथमः (iii) धर्मः (iv) इति

(ख) अस्मिन् श्लोके किं क्रियापदम् अस्ति?

(i) तस्मात् (ii) रक्षेत् (iii) वचः (iv) विशेषतः

प्रश्न 3.अधोलिखितं नाट्यांशं पठित्वा प्रदत्तप्रश्नान् उत्तरत 4 अंक

भीमः - (युधिष्ठिरं प्रति) भ्रातः। द्रौणिं अनुगन्तुं मह्यम् अनुमतिं ददातु भवान्।

युधिष्ठिरः - गच्छ वत्स! विजयी भव! नकुलः तव सारथिः भवतु।

(भीमसेनः निर्गच्छति, श्रीकृष्णः अर्जुनेन सह प्रविशति)

श्रीकृष्णः - भो धर्मराज। समीचीनं न कृतं भवता। पुत्रशोकविह्वलः भीमसेनः एकाकी एव द्रौणिं हन्तुम् अभिधावति।

युधिष्ठिरः - भगवन्! सः तु एकाकी एव द्रोणपुत्राय अलम्।

श्रीकृष्णः - वत्स! न जानाति भवान् द्रौणेः चपलां प्रकृतिम्। पितुः द्रोणात् प्राप्तं ब्रह्मशिरः नाम अस्त्रं विद्यते तस्य पार्श्वे। यदि तत् प्रयुज्यते, सर्वा पृथ्वी दग्धा स्यात्।

प्रश्नाः-

I. एकपदेन उत्तरत ½×2=1

(क) कम् अनुगन्तुम् युधिष्ठिरः अनुमतिं यच्छेत्?

(ख) पितुः द्रोणात् प्राप्तं किम् नाम अस्त्रं द्रौणेः पार्श्वे विद्यते?

II. यदि ब्रह्मशिरः अस्त्रं प्रयुज्यते तर्हि किं स्यात्? 1×2=2

विकल्पेभ्यः उचितम् उत्तरं चित्वा लिखत-

III. (क) प्रकृतिम् इति पदस्य विशेषणपदं किम्? ½×2=1

(i) भवान्  (ii) द्रौणे:  (iii) चपलाम्(iv) जानाति

(ख) 'स:' इति पदं कस्मै प्रयुक्तम्?

(1) श्रीकृष्णाय (2) द्रौणपुत्राय (3) युधिष्ठिराय (4) भीमसेनाय

प्रश्न 4. मञ्जूषात: समुचितं पदं चित्वा अधोलिखितश्लोकद्वयस्य अन्वयं पूरयत- ½×8=4

(क) विद्वांस एव लोकेऽस्मिन् चक्षुष्मन्त: प्रकीर्तिता:।

अन्वय: - अस्मिन् ....................[1] विद्वांस: एव ..................[2] प्रकीर्तिता:। अन्येषां वदने ये (चक्षुषी) ...............[3] तु चक्षुनामनी .................[4]।

(ख) य इच्छत्यात्मन: श्रेय: प्रभूतानि सुखानि च।

न कुर्यादहितं कर्म स परेभ्य: कदापि च।।

अन्वय: - य: .............[5] श्रेय: प्रभूतानि ..............[6] च इच्छति स: ............[7] परेभ्य: ..............[8] कर्म न कुर्यात्।

मञ्जूषा

| |
|---|
| मते, कदापि, लोके, आत्मन: ते, अहितम्, चक्षुष्मन्त:, सुखानि |

प्रश्न 5. रेखाङ्कितपदानि आधृत्य प्रश्ननिर्माणं कुरुत 1×4=4

(क) राजहंसी काकं कथयति - त्वं तु कटु क्वणसि।

(ख) साधूनाम् चित्ते वाचि च सरलता भवति।

(ग) अरुणाचले अनेके उत्सवा: मान्यन्ते।

(घ) प्रच्छन्नभाग्यस्य गृहम् मणीनाम् आभया भासमानम् अभवत्।

प्रश्न 6.अधोलिखितवाक्यानि घटनाक्रमानुसारं पुन: लिखत। ½×8=4

(क) छात्राणां स्वागताय प्रवेशद्वारम् उभयत: स्थित: बालसमूह: अभिनन्दनगीतं गायति।

(ख) प्रक्षेपकयन्त्रेण केषाञ्चित् दर्शनीयस्थलानां परिचय: दीयते।

(ग) छात्रा: अरुणाचलप्रदेशस्य दर्शनीयस्थलानां विषये ज्ञानं प्राप्य स्थलानां दर्शनाय अतीव उत्सुका: भवन्ति।

(घ) सर्वे छात्राः जलपानाद् अनन्तरं भ्रमणाय गमिष्यन्ति।

(ङ) अरुणाचलप्रदेशस्य एकस्मिन् विद्यालये छात्राणां एकः दलः आगच्छति।

(च) पर्यटनाधिकारी प्रश्नोत्तरमाध्यमेन अरुणाचलप्रदेशस्य दर्शनीयस्थलानां विषये ज्ञानं यच्छति।

(छ) छात्राः पर्यटनविभागेन प्रकाशितां प्रसिद्धस्थलानां सूचीं पठन्ति।

(ज) सभागारे प्रदेशस्य पर्यटनाधिकारी छात्रान् प्रतीक्षते।

प्रश्न 7. रेखाङ्कितपदानां प्रसङ्गानुसारम् अर्थं चित्वा लिखत – 1×4=4

(क) परमहम् अखण्डः <u>शाश्वतः</u> विभुः च।

| | | | |
|---|---|---|---|
| (i) | शशकवत् | (ii) | सरस्वत्याः |
| (iii) | शिशुवत् | (iv) | नित्यः |

(ख) मौनं धृत्वा <u>वराकान्</u> मीनान् छलेन अधिगृह्य भक्षयसि।

| | | | |
|---|---|---|---|
| (i) | श्रेष्ठान् | (ii) | बलाकाम् |
| (iii) | दयनीयान् | (iv) | बालकान् |

(ग) गृहाण चक्रम् इति उक्तः सः सव्येन <u>पाणिना</u> चक्रम् गृहीतवान्।

| | | | |
|---|---|---|---|
| (i) | सुंदरेण | (ii) | हस्तेन |
| (iii) | जलेन | (iv) | पाणिनिमुनिना |

(घ) यः व्यसनं प्राप्य केवलं <u>परिदेवयेत्</u> तस्य क्रन्दनं वर्धते अन्तं न समधिगच्छति।

| | | | |
|---|---|---|---|
| (i) | परितः भ्रमेत् | (ii) | विलापम् कुर्यात् |
| (iii) | परितः दानं कुर्यात् | (iv) | देवतां स्मरेत् |

**अंक योजना**

**मार्च–2013**

**संस्कृतम् सम्प्रेषणात्मकं**

**अंकयोजना**

**खण्ड 'क'**

(क) (अ) शिक्षक: 1×2 = 2

(ब) अध्यापकेभ्य:

(ख) (अ) सद्गुरु: मनुष्यं राष्ट्रस्य मानवजाते: च कल्याणाय प्रेरयति। 1×2=2

(ब) तत् राष्ट्रं धन्यं यस्य शिक्षका: सततं चिन्तने लेखने पाठने विद्यार्थिनां दिग्दर्शने च निरता: सन्ति।

(ग) (अ) महत्त्वपूर्णा (ii) 1×4=4

(ब) शिक्षकेभ्य (iv)

(स) ये (ii)

(द) सततम् (i)

(घ) 'अभिनन्दनीया: शिक्षका:' अथवा कोऽपि अन्य: शीर्षक:। 2

## खण्ड 'ख'

उत्तर 1. खण्ड 'ख' रचनात्मकं कार्यम्- 15

I दिल्लीनगरात्, ½×10=05

II नमो नमः

III गतमासे

IV अभवन्

V मञ्चनम्

VI अपि

VII प्रदर्शितानि

VIII अनेकानि

IX अन्वभवम्

X श्रेया

उ. 2. छात्राः चित्रं दृष्ट्वा मञ्जूषायाः सहायतया पञ्चवाक्यानां निर्माणं करिष्यन्ति। 2×5=10

एकः अङ्कः तथ्याय एकः अङ्कः भाषायाः शुद्धतायै

अथवा

अनुच्छेदे अपि पञ्चवाक्यानां निर्माणं भविष्यति।

एकः अङ्कः तथ्याय एकः अङ्कः भाषायाः शुद्धतायै

## खण्ड 'ग'

उ. 1. (i) कुक्कुटः+अपि 1×5=5

(ii) उभावेव

(iii) जगन्नाथः

(iv) अयम्+शोकः

(v) कश्चित्

उ. 2. I (ii) स्नेहेन सहितम्

II (i) श्रीकृष्णः च अर्जुनः च

III (ii) प्रचण्डाः ज्वालाः यस्य सः

IV (ii) अनुरथम्

V(iii) यथेच्छम्

VI(ii) कृतं भोजनं येन सः

| | | | |
|---|---|---|---|
| उ. 3. (क) I | (i) | भास्+शानच् | ½×6=3 |
| II | (iv) | परि+गण्+शतृ | |
| III | (iii) | पुत्री | |
| IV | (i) | सुन्दर+तल् | |
| V | (iv) | स्वच्छता | |
| VI | (ii) | अध्यापिका | |

| | | | |
|---|---|---|---|
| उ. 3 (ख) | (i) | सेवमानः | 1×2=2 |
| | (ii) | गुरु+त्व | |

| | | |
|---|---|---|
| उ. 4. i) | श्वः | 1×5=5 |
| ii) | मा | |
| iii) | बहिः | |
| iv) | ह्यः | |
| v) | कदापि | |

उ. 5.(क)(I) (iii) चतस्रः 1/2×4=2

(II) (i) एकः

(II) (ii) त्रीणि

(IV) (iii) द्वौ

उ. 5. (ख) (i) एकपञ्चाशत् 1×2=2

(ii) षण्णवतिः

उ. 6. I (iv) कुर्मः 1×5=5

II (ii) अभवत्

III (i) सर्वाः

IV (ii) छात्राः

V (iii) द्वे

**खण्ड 'घ' पठित – अवबोधनम् – 35 अङ्काः**

उ. 1. I (i) प्रच्छन्नभाग्यस्य (ii) दुष्टबुद्धिः ½ × 2 = 1

II (i) नाथ / विरम अस्मात् लोभात्। 1× 2 =2

III (क) ii) दृष्टः ख) iii) परद्रव्ये ½ ×2=1

उ. 2. (i) आचारः (ii) प्राणेभ्यः / प्राणेभ्यो ½ ×2=1

II i) आचारः प्रथमो धर्मः इति एतत् विदुषां वचः। 2×1=2

III (क) (iv) इति (ख) (ii) रक्षेत् ½ × 2=1

उ. 3. I (i) द्रौणिम् (ii) ब्रह्मशिरः 1×2=2

II यदि ब्रह्मशिरः अस्त्रं प्रयुज्यते तदा सर्वा पृथ्वी दग्धा स्यात्। 2×1=2

III (क) (iii) चपलाम्  (ख) (iv) भीमसेनाय  ½ × 2=1

उ. 4. (क) 1. लोके  2. चक्षुष्मन्तः  3. ते  4. मते  1/2×8=4

(ख) 5. आत्मनः  6. सुखानि  7. कदापि  8. अहितं

उ. 5. (क) का कथयति – 'त्वं तु कटु क्वणसि' इति?  1×4=4

(ख) केषां चित्ते वाचि च सरलता भवति?

(ग) कुत्र/कस्मिन् अनेके उत्सवाः मान्यन्ते?

(घ) प्रच्छन्नभाग्यस्य किम् मणीनाम् आभया भासमानम् अभवत्?

उ. 6. (क) (v) अरुणाचलप्रदेशस्य एकस्मिन् विद्यालये एकः दलः आगच्छति।

(ख) (i) छात्राणां स्वागताय प्रवेशद्वारम् उभयतः स्थितः बालसमूहः अभिनन्दनगीतं गायति।

(ग) (viii) सभागारे प्रदेशस्य पर्यटनाधिकारी छात्रान् प्रतीक्षते।

(घ) (vi) पर्यटनाधिकारी प्रश्नोत्तरमाध्यमेन अरुणाचलप्रदेशस्य दर्शनीयस्थलानां विषये ज्ञानं यच्छति।

(ङ.) (ii) प्रक्षेपकयन्त्रेण केषाञ्चित् दर्शनीयस्थलानां परिचयः दीयते।

(च) (viii) छात्राः पर्यटनविभागेन प्रकाशितां सूचीं पठन्ति।

(छ) (iii) छात्राः अरुणाचलप्रदेशस्य विषये प्रसिद्धस्थलानाम् ज्ञानं प्राप्य स्थलानां दर्शनाय उत्सुकाः भवन्ति।

(ज) (iv) सर्वे छात्राः जलपानानन्तरं भ्रमणाय गमिष्यन्ति।

उ. 7. (क) iv) नित्यः  1×4=4

(ख) iii) दयनीयान्

(ग) ii) हस्तेन

(घ) ii) विलापं कुर्यात्

## मूल्यपरक प्रश्न

वाक्यानि पठित्वा वाक्याधारितान् प्रश्नाम् उत्तरत –

1. 'न अस्ति त्यागसमं सुखम्' इति वाक्ये कस्य महत्त्वं वर्णितम्?

2. 'परम्–आपद्गतेन अपि रणे अन्येषां नाशं कर्तुम् अस्त्राणां प्रयोगः न करणीयः' इति वाक्ये केषां प्रयोगः निषेधः कृतः।

3. 'न कुर्यात' अहितं कर्म परेभ्यः कदापि। परेभ्यः किं न करणीयम् ?

4. 'अहो! कुमार्गम् आश्रितस्य मम कीदृशी इयं क्लेश परम्परा।
   मनुष्यः कीदृशं मार्गम् आश्रित्य क्लेशं प्राप्नोति ?

उत्तर : मूल्यपरक

(1) त्यागस्य

(2) अस्त्राणां

(3) अहितं

(4) कुमार्गम्